प्रवेश सं० ८०६.८०१ विषयः धर्मशास्त्रम् क्रम सं०

नाम शूद्रकमलाकरः 12026 ग्रन्थकार कमलाकरः

पत्र सं० ३५-४२ .

श्लोक सं० अक्षर सं० (पंक्तौ) ४० पंक्ति सं० (पृष्ठे) १०.

आकारः ९.६"×४.२½". लिपिः दे.ना. आधारः का.

वि० विवरणम् अपूर्ण (शूद्रधर्मसंस्काराविवर्णनम्)

जी० एस० यू० पा०--७७ एस० सी० ई०--१६५१--५०,०००

डि० १४३३

Indira Gandhi National Centre for the Arts

द्वि· १४३३

॥ ततो नीराजनादि कार्यं ॥ इति चौलं ॥ अथ विद्यारंभः ॥ मदनरत्ने नृसिंहः ॥ अक्षरस्वीकृतिं कुर्यात् प्राप्ते पंचम
हायने ॥ उत्तरायणगे सूर्ये कुंभमासं विवर्जयेत् ॥ अथ धनुर्विद्या ॥ दीपिकायां ॥ अदितिगुरुयमार्कस्वातीचि
त्राश्विनिपित्र्यध्रुवहरिवसुमूलेष्विंदुभागांत्यभेषु ॥ विशशिबुधवारे विष्णुबोधे विपौषे सुसमयतिथियोगे चा
पविद्याप्रदानं ॥ तत्र हरिलक्ष्मीसरस्वतीश्च पूजयित्वा कार्यं ॥ सर्वायुधमहाभाग सर्वदेवारिसूदन ॥ चापमाम
मेरक्षसाकं शरवरैरिह ॥ धतं कलौ नरक्षार्थं संहाराय हरेण च ॥ त्रयीभूर्निगतं देव धनुरस्त्रं नमाम्यहमिति
मंत्रेण संपूज्य नत्वा बाणं प्राच्यां मुक्त्वा विप्रान् पूजयेत् ॥ अथ छुरिकाबंधनं ॥ ज्योतिर्निबंधे ॥ छुरिकाबंध
नं वक्ष्ये नृपाणां प्राक्करग्रहात् ॥ विवाहोक्तेषु मासेषु शुक्लपक्षे प्यनलग्ने ॥ जीवशुक्रे च भूमिपुत्रे चंद्रताराब
लान्विते ॥ सौजीवं धर्सतिथि कुजवर्जिते वासरे ॥ संग्रहे ॥ शूद्राणां राजपुत्राणां सौम्यभावे स्त्र बंधनं ॥ सौ
जीवं धनतिथ्यादौ कार्यं भौमदिनं विना ॥ विष्णुधर्मे ॥ पूजयित्वा हरिं लक्ष्मीं तथा देवीं सरस्वतीं ॥ स्वविद्या
स्त्रकारांश्च स्वां च विद्यां विशेषतः ॥ एतेषामेव देवानां नाम्नानु जुहुयाद्धृतं । दक्षिणाभिर्द्विजेंद्राणां कर्तव्य

Indira Gandhi National Centre for the Arts

चात्रपूजनं। मंत्रस्तु॥ सर्वायुधानां प्रथमं निर्मितासि पिनाकिना॥ शूलायुधाद्विनिष्क्रम्य सत्वा मुष्टि— हात्मु
३५ भो॥ चंडिकायाः प्रदत्तासि सर्वदुष्टनिबर्हिणी॥ तयापि रक्षिता चासि॥ प्रतिपादिता सर्वसत्वांगभूतासि सर्वा
शुभनिबर्हणी॥ छुरिके रक्ष मां नित्यं शांतिं पञ्छ नमोस्तु ते॥ इति संपूज्य नत्वा दक्षिणे करि भांगं बध्नीयात्॥
॥ अपरार्के वृद्धशातातपः॥ शिशोरभ्युक्षणं प्रोक्तं बालस्याचमनं स्मृतं। रजस्वलादि संस्पर्शे स्नानमेव कुमा
रके॥ प्राक्चूडाकरणाद्बालं प्रागन्नप्राशनाच्छिशुः॥ कुमारस्तु स विज्ञेयो यावन्मौंजीनिबध्यते। बालस्पर्शं
च मातृषोड्शार्थं शौचमादिशेदित्यादिमत्कृते निर्णयसिंधौ ज्ञेयं॥ ॥ अथ विवाहः॥ तत्र माधवीये शूद्राणां
द्विजवदेव॥ सर्वोत्रावयवानुहर्जः सद्भावादिति विज्ञानेश्वरः॥ तत्क्रमया निर्णयसिंधवुक्तमिति नात्रोच्यते॥
तत्र ब्राह्मार्षदैवप्राजापत्यगांधर्वासुरराक्षसपैशाचा अष्टौ विवाहाः॥ तानाह याज्ञवल्क्यः॥ ब्राह्मो विवाह ३५
आहूय दीयते शक्त्या लंकृता॥ यत्तस्यत्रास्त्रिजे दैव आदायार्षस्तु गोद्वयं॥ स्युक्त्वा चरतां धर्मं सहया दीय
ते चार्थिने॥ स कार्यः पावयेत्तज्जः षट् षट् वंश्यान्सहात्मना॥ आसुरो द्रविणादानाद्गांधर्वः समयान्मिथः॥

राक्षसो युद्धहरणात्पैशाचः कन्यकाछलादिति॥ एषु शूद्रस्य प्राजापत्यो मुख्यः॥ आसुरगांधर्वौ
धर्म्यौ॥ राक्षसपैशाचौ कनिष्ठौ॥ तदाह मनुः॥ आसुरं वैश्यशूद्रयोः। षडानुपूर्व्या विप्रस्य क्षत्रस्य च
तुरो वरान्॥ विट्शूद्रयोस्तु तानेव विद्या— ध्म्यान्राक्षसान्। चतुरः आसुरगांधर्वराक्षसपैशाचा
न्॥ तान्चतुरो राक्षसवर्ज्यान्॥ कल्पतरौ ब्राह्मविवाहमुक्त्वा ब्राह्मणानां सनातनः धर्म इत्युक्ते ब्रा
ह्मदैवौ विप्रस्यैव॥ अन्ये त्रयाणां तुल्याः॥ हेमाद्रौ पैठीनसिः॥ राक्षसो वैश्यस्य पैशाचः शूद्रस्य स
र्वेषामार्षप्रमाणं॥ प्रचेताः॥ पैशाचो संस्कृते वसुतानां प्रतिलोमजानां चेति विशेषो मेधाति
थौ कल्पतरौ च ज्ञेयः॥ तत्र गांधर्वराक्षसपिशाचान्। विना सर्वे त्वोदकपूर्वदानं नियतं॥ वसिष्ठः॥
नोदकेन न वाचा च कन्यायाः पतिरुच्यते॥ पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे॥ गांधर्वादि
ष्वपि होमादिकार्यमेव। गांधर्वासुरपिशाचाविवाहराक्षसश्च मः॥ पूर्वं परिग्रहस्ते ज्वपश्चाद्धोमो वि
धीयते॥ इत्यपरार्के वसिष्ठोक्तेः॥ अतएव होमाद्यभावे ऽन्यस्मै दानमाह तुस्तत्रैव वसिष्ठबौधायनौ॥

Indira Gandhi National
Centre for the Arts

बलादपहृता कन्या मंत्रैर्यदि संस्कृता। अन्यस्मै विधिवद्देया यथा कन्या तथैव सा॥ शूद्रस्य न सोमं त्रागव॥ मनुरपि।
पाणिग्रहणिका मंत्रा नियतं दारलक्षणं॥ तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे। तत्र पाणिग्रहणं सवर्णकर्मा
मं। पाणिग्राह्यः सवर्णास्वित्यविशेषेण याज्ञवल्क्योक्तेः॥ उदकपूर्वं कन्यादानस्य शूद्रे विकल्पः॥ तदुक्तं स्मृति
कौमुद्यां ब्राह्मे॥ युक्तं तु पाणिग्रहणं सवर्णासु सदैव हि॥ जलपूर्वं तु विप्राणामन्येषामपि काम्ययेत्॥ अन्ये
तु एतेन ब्राह्मोऽपि भवति। अलंकृत्य कन्यामुदकदानपूर्वां दद्यादेष ब्राह्मो विवाह इत्याश्वलायनेन ब्राह्म एव
जलपूर्वत्वोक्तेः॥ अन्यविशेषा निर्णयसिंधौ ज्ञेयाः॥ स्मृतिकौमुद्यां ब्राह्मे॥ दृष्टिं वै नायकीं कृत्वा शचीयागं च
शोभन॥ नांदीमुखेभ्यश्चाद्यं च पितृभ्यः कार्यसिद्धये॥ वाराहसंहितायां॥ गृहस्थितां देवपुरोहितपत्नीं प्राग्रध्य
संध्यास्तमये पुकन्याः स्रक्चंदनगंधधूपैः प्रतिपूजयेत्तु पाणिग्रहे याममुपागतेति। अथ प्रयोगः॥ शूद्र ३६
स्य शूद्रापरिणयने मंत्ररहितं क्रिया कार्येति हरिहरभाष्ये उक्तं॥ तेन कातीयं कर्मोच्यते॥ तत्र विवाहोक्ते मु
हूर्ते कन्यायाः पिता भ्राता अन्यो वा बंधुर्वरगृहं गत्वा च स्वदेशकालौ संकीर्त्य करिष्यमाणविवाहांगत्वेन वाग्

दानं करिष्य इति संकल्प्य गणेशवरुणौ च संपूज्य वरस्य पादप्रक्षालनं। गंधवस्त्राद्यैः पूजां कृत्वा पूगीफलं ना
लिकेरं कुंकुमादिरंजितवस्त्रं च आदाय अमुकप्रपौत्राय अमुकपौत्राय अमुकपुत्राय अमुकदासाय वराय अमुकप्रपौ
त्रीं पौत्रीं पुत्रीं च अमुकनाम्नीं कन्यां ज्योतिर्विदुक्ते मुहूर्ते दास्ये इत्युक्त्वा॥ अव्यंगे अपतिते क्लीबे दशदोषविव
र्जिते॥ तत्कालोपस्थिते कन्यां पिता तुभ्यं प्रदास्यतीति॥ पिता तु अहं दास्याम्यसंशयमिति वदेत्॥ स्नाने स्नाता
म रोगिणी वा पाठः॥ केचित्तु। कन्यागृहे गत्वा तां संपूज्य अव्यंगे अपतिते क्लीबे दशदोषविवर्जिते। इमां क
न्यां प्रदास्यामि देवाग्निगुरुसन्निधौ इति कन्यापिता वरबंधुहस्ते दत्वा वाचा दत्ता मया कन्या वरणार्थं स्वीकृ
ता मया॥ कन्यावलोकनविधौ निश्चिंतस्त्वं सुखी भवेति कन्यापिता॥ वाचा दत्ता त्वया कन्या वरावलोकन
विधौ इत्यूहेन वरपिता वदेदित्याहुः॥ ततः परस्परमर्चनं विप्रपूजादि कार्यं। ततः आचारात् हरिद्रावंदनादि
विवाहोक्ते मुहूर्ते कार्यं॥ इति वाग्दानं॥ ततः पूर्वदिने विवाहदिने वा शनैः कन्यावरयोः पिताभ्यंगं कृत्वा ग्रहवि
नायकशांत्यादि कृत्वा देशकालौ संकीर्त्य अमुकस्य विवाहांगत्वेन गणेशपूजा पुण्याहवाचनमातृपूजा वसोर्धारा शची

Indira Gandhi National
Centre for the Arts

पूजांतथानांदीमुखान्पितृन्श्राद्धानिकरिष्यइत्युक्त्वातानिपूर्ववत्कृत्वातंदुलपूर्णंकुंभद्वयेः विघ्नयंत्रंपात्रेणखा
३७ सुनंदिनीनलिनीमैत्रीउमापशुवर्द्धिनीगर्भेभगवतीचमातृसन्निधौसंस्थाप्याचतुर्थदिनंमंडपदेवताःपूजये
त्॥ पीतसूत्रेणकंकणंबध्वाकन्यायाःसप्तभिःपंचभिर्वाकरैर्मितांपंचसप्तसोपानांवेदींकुर्यात्॥ चतु
र्हस्तांवेदीमितिहरिहरः। वरस्यसीमांतपूजांकृत्वागृहागतंवरमभानेमापवर्णयेत्॥ तत्र आचार्योवेद्यांहस्त
मात्रंस्थंडिलंदर्भैःपरिसमुह्यगोमयेनोपलिप्ययज्ञियकाष्ठेनप्रागग्रास्तिस्रोलेखाःकृत्वात्रिर्मृदमुद्धृत्या
भ्युक्ष्याग्निंप्रतिष्ठाप्यवरस्यप्राङ्मुखस्यमधुपर्कपूजांकुर्यात्॥ यथा। कन्यापितामेनंदत्वातस्यपश्चात्तिष्ठं
तंवरमाहसाधुभवानास्तामर्चयिष्यामोभवंतमिति। अर्चयेतिवरः॥ ततःविष्टरो ३ इत्यन्येनत्रिरुक्तेदाता
प्रत्यङ्मुखस्तिष्ठन्प्रतिगृह्यतामितिकूर्चंपंचविंशतिकुशमयंदद्यात्। तंवर आसनस्यपश्चात्तिष्ठन्। गृही ३७
त्वाविष्टरायनमइत्यासनेदत्वोपविशेत्॥ ततोन्येनत्रिःपाद्यमित्युक्तेगंधदूर्वाक्षतयुतंपाद्यंदत्वाप्रतिगृह्य
तामितिनिवेदितेनवरःआदौसव्यंततोदक्षिणमितिपादौप्रक्षालयेत्। ततोदातान्यंविष्टरमन्येनत्रिर्निवेदि

तमादायवरपादयोर्दद्यात्। ततोगंधपुष्पाक्षतकुशतिलसर्षपदधिदूर्वायुतमर्घ्यमादायान्येनार्घइतित्रिरुक्ते
दाताप्रतिगृह्यतामितिदद्यात्॥ वरस्तमभ्योनमइत्यंजलिनादायशिरसाभिवाद्यभूमौक्षिपेत्॥ ततोन्येना
चमनीयमितित्रिरुक्तेदत्तेप्रतिगृह्यसकृदाचम्याचामेत्॥ ततोन्येनमधुपर्कइत्युक्तेदात्रादत्तंकांस्यस्थंतेने
वपिहितंदधिमधुघृतंवाबरोदात्तहस्तस्थमुद्घाट्यसवित्रेनमइत्यवेक्ष्यसवित्रेनमइतिप्रतिगृह्यवामेनिधाय
मधुपर्कायनमइत्यनामिकयालोड्यानामिकांगुष्ठाभ्यांबहिःक्षिप्त्वापुनरेवंद्विःकृत्वाताभ्यामेवत्रिःप्राश्नीया
त्॥ मधुपर्कायनमइतिवा॥ अंगुष्ठानामिकयाद्वितीयमंगुष्ठमध्यमाभ्यांतृतीयमितिस्मृतिकौमुदी॥ तच्चितं
॥ ततःशेषमसंचरेनिनीयद्भिराचम्यवाचेनमःमुखे। प्राणायनमःनसोः चक्षुर्भ्यां० चक्षुषोः॥ श्रोत्राभ्यां० क
र्णयोः। बलायेतिबाह्वोः। ओजसइत्यूर्वोः। अंगेभ्यःइत्यंगेषु॥ ततोन्येनत्रिर्गौरित्युक्तेप्रतिगृह्यारुद्राणा
मातेवसूनांदुहितेआदित्यस्वसेगवेनमः॥ ममाचकस्यचपाप्मानंहनइत्युपांशु। ततःमुत्सृजेनंतःपरंध
त्वामुखंनिरीक्षेत॥ अन्येतुलग्नसमयेपाणिग्रहणमिच्छंति॥ ततोनःपमपसार्यवरेणवधूमुखंवधूमुख

Indira Gandhi National
Centre for the Arts

मीक्षेत। अथवा अग्निप्रतिष्ठाप्य पश्चादग्नेस्तृणपुंजकटवा निधाय वरो वधूमुखमीक्षेत॥ कन्यापितृदत्तवस्त्रं च
तुष्टयमध्ये दद्यात्॥ आयुष्मतीदं वासः परिधत्स्वेति अनेन मंत्रेणाद्यात्॥ सा च वाससेनमद्रसा परिदध्यात्॥ ततो दा
त्रा वधूमीक्षस्वेति प्रेमितो वधूमीक्षेत॥ ततः कन्यादानमिति हरिहरः॥ अन्ये तु कन्यादानोत्तरं वस्त्राद्यादुः॥
ततः करोतु स्वस्तिते ब्रह्मन्स्त्याधे रक्षतारोपणांते कन्यापिता दक्षुखः स्वदक्षिणे पत्नीमुपवेश्य कुशपाणि
र्गाचम्य देशकाली संकीर्त्य। मम समस्तपितॄणां निरतिशयानंदब्रह्मलोकावाप्त्यादि कन्यादानोक्तफलावाप्त
ये। नेन वरेण अस्यां कन्यायामुत्पादयिष्यमाणसंतत्या द्वादशावरान्द्वादशपरान्प्राजापत्यपक्षे
ऽष्टावरानष्टौ परान्पुरुषान्पवित्रीकर्तुमात्मनश्च श्रीलक्ष्मीनारायणप्रीतये ब्राह्मविवाहविधिना। प्राजाप ३८
त्यविधिना वालं... कन्यादानमहं करिष्ये इत्युक्त्वा पठेत्। कन्यां कनकसंपन्नां कनकाभरणैर्युतां॥ दास्यामि वि
ष्णवे तुभ्यं ब्रह्मलोकजिगीषया॥ विश्वंभरः सर्वभूतात्मा साक्षिणः सर्वदेवताः॥ इमां कन्यां प्रदास्यामि पितॄणां
तारणाय चेति॥ ततः कांस्यपात्रे वरहस्तोपरि वधूहस्तस्य हस्तं न्यस्य। वरहस्ते सुप्रोक्षितमस्तु। शिवा आपः संतु।

सौमनस्यमस्तु। इत्युक्त्वा। कन्यानारायण पुण्यं वर्द्धतां शांतिपुष्टिस्तुष्टिश्चास्तु। तिथिकरणमुहूर्तनक्षत्रसंपद
स्तु॥ पुण्याहं भवंतो ब्रुवंतु। पुण्याहमिति विप्राः। स्वस्ति भवंतः। ऋद्धिं भवंतो० श्रीरस्त्विति भव०॥ अमुकदा
सोऽहं मम समस्तपितॄणामित्यादि लक्ष्मीनारायणप्रीतये इत्यंतं प्राग्वदुक्त्वा॥ काश्यपसगोत्रस्य ब्रह्मदासस्य
प्रपौत्राय। विष्णुदासस्य पौत्राय शिवदासस्य पुत्राय काश्यपसगोत्राय देवदत्तदासाय वराय काश्यपसगोत्रां चैत्र
दासस्य प्रपौत्रीं मैत्रदासस्य पौत्रीं भोजदासस्य पुत्रीममुकप्रेष्ठां नाम्नीं वा कन्यां प्रजापतिदैवत्यां यथाशक्त्यलं
कृतामित्युक्त्वा पुनरेवं द्विरुः ज्वार्यशतज्योतिष्टोमातिरात्रफलसमफलप्राप्तिकाम। प्रजोत्पादनार्थं सहध
र्मचरणार्थं प्राजापत्ये सह धर्मं चरतं भार्यात्वेन तुभ्यमहं संप्रददे इति कुशयवयुतं जलं कन्याहस्तं च वरह
स्ते क्षिपेत्। मयापि दत्तेति मातापि वदेदिति केचित्॥ गोत्रोच्चारणं नेति केचित्॥ वरः प्रतिगृह्णामि स्वस्ति
इत्युक्त्वा भुवं स्पृशेत्॥ गौरीं कन्यामिमां भो स्त्य यथाशक्ति विभूषितां॥ गोत्राय चैव दासाय तुभ्यं दत्तां समाश्र
य॥ कन्ये ममाग्रतो भूयाः कन्ये मे देवि पार्श्वयोः॥ कन्ये मे पृष्ठतो भूयास्त्वद्दानात्स्वर्गमाप्नुयात्॥ मम वंशकुलेजा

Indira Gandhi National
Centre for the Arts

तापालिताचक्रराएकं ॥ तुभ्यंदाममयाद त्तापुत्रपौत्रविवर्धिनीतिपठेत् ॥ ततः कन्यादानप्रतिष्ठासिध्यर्थं
द्रव्यंसुवर्णंगोमिथुनं च दक्षिणांसंप्रददेइतिदद्यात् । ततः शाक्तोस्यांताम्रकांस्यपात्रगतान्वदामादिदद्यात् ॥
३९ कन्याबांधवाश्चपोतकंदद्युः । वरनत्पित्रादयोपिदद्युरितिकेचित् ॥ होमांतेकेचिदाहुः ॥ ततः चतुर्वारंपंचवा
रंवावधूवरौसूत्रेणावेष्ट्यापरितनमधोमार्गेणाधस्तनंचोपरितः निःकास्यत्रिगुणंपानचकृत्वाधस्तनं
वरहस्तेउपरितनंचवधूहस्तेकंकणंबध्नीयात् ॥ येनबद्धोबलीराजादानवेंद्रोमहाबलः ॥ तेनत्वामपिब
ध्नामिरक्षेमाचलमाचलेति ॥ ततः वधूवराभ्यांदुग्धार्द्रौक्षतारोपणंवध्वादौवरेणचकार्यं ॥ मन्त्रास्तु ॥ न
मायनमः । यज्ञाय । श्रियै । धर्माय । प्रजायै यशसे । इति ॥ ततः प्राङ्मुखावुपवेश्यवरमिकन्यायैदद्यात् ॥ मा
चबासाभ्यांनमइतिपरिदध्यात् ॥ ततोवरोमांगल्यतंतुनानेनममभर्तृजीवनहेतुना । कंठेबध्नामीसुभगे
त्वंजीवशरदांशतमितिसौभाग्यतंतुवधूगलेबध्नीयात् । ततोविश्वेदेवेभ्योमातरिश्वधातृभ्योनमइतिव ३९
धूमीक्षेत् ॥ अत्रवाकोमुभमन्त्रेणककणा ॥ ततोवध्वाप्राङ्मुखोतेननीदीरणकरेपश्चादग्नेरुपविश्यदक्षि

लेऐशान्यांवामंगलकुंभस्कंधेगृहीत्वाकश्चिन्निष्ठेदासमपर ॥ उत्तरेरदब्दुपलेचालंकृतेनिधायात्र
वरःकन्यानामवदेदित्याचारः ॥ तेनैवधूपित्रापरस्परसमीक्षितव्यमित्युक्ते । न्योन्यंसमीक्ष्य ॥ अघोरच
क्षुरपतिघ्न्येधिशिवाचसुमनास्तथा ॥ सुवार्चाः पुत्रसूर्देवकामाचसुखदाभवेतिवरोवदेत् ॥ सोमगंध
र्वाग्निपूषभ्योनमः इतिचर्द्वाणांग्रह्यसूत्राध्ययनाभावात्तदुक्तहोमांगकलापज्ञानाभावान्नद्युक्ति
शक्यभावाच्चविवाहेहोमएवनास्तीतिमदनपालः ॥ अन्येतुप्रधानेधिकारसिद्धोस्यपत्नीष्टिवदंगेपिश्र
वणोपदेशादिनाज्ञानसंभवात्होममाहुः ॥ यथा । गुरूर्दक्षिणेनब्रह्मासनंदत्वानमुपवेश्यमन्त्रयेपात्रे
जलपूर्णेकुशान्निधायोत्तरतःकुशेषुनिधाग्निंदर्भैः पूर्वादिपरिस्तीर्यासादनंकुर्यात् ॥ त्रीणितृणानि
द्वेपवित्रेप्रोक्षणीमाज्यस्थालीचरुस्थालीसंमार्गकुशाः उपयमनकुशास्तिस्त्रःसमिधःस्रुवआज्य
तंदुलाःलाजाःशूर्पीसंस्त्रवपात्रं । अश्म ॥ आनदूहंचर्म ॥ गोर्दक्षिणेति ॥ ततः प्रादेशमात्रेपवित्रेछित्वाप्रोक्ष
णीःसंस्कृत्यपवित्राभ्यामुत्पूयनत्रतेनिधायदक्षिणेनसव्येहस्तोदिंगनंकृत्वापात्राणिप्रोक्ष्यनिधायाज्यं

Indira Gandhi National
Centre for the Arts

स्थाल्यां निरुप्याग्नेर्दक्षिणेऽधिश्रित्योल्मुकेन लाजैः सह पर्यग्निं कृत्वाऽक्तं प्रताप्य दक्षिणेन निधायाज्यमुद्वास्यो
४० त्पूयावेक्ष्य स्रुवं निरस्य पुनः प्रोक्षणीरुत्पूयावेक्ष्योपयमन कुशानादायोत्थायाग्नेरिति स्रुवः समिधोऽभ्याधाय प्रो
क्षणीभिः पर्युक्ष्य वरेणान्वारब्धो गुरुर्दक्षिणं जान्वाच्य ब्रह्मणा दक्षिणहस्तेऽन्वारब्धः स्रुवेणाजुहुयात्॥ मंत्रो
वरस्यैव। ततो वरो दध्यादक्षिणं हस्तं साङ्गुष्ठमुत्तानमुत्तानेन हस्तेन गृह्णीयात्॥ तत्रमंत्रः॥ भगोऽर्यमसवितभ्यो
नमः चित्रसोम्यगुणैर्युक्तावीरसूर्जावसूर्भव॥ कुले मदीये सस्नात्वीमंच्चित्तानुगता सदेति। ततो गृहीनाभिवव
धूमुत्तरतोऽग्नेर्दक्षिणेन पदाश्मानमारोहयति॥ कन्यायै नम इति। ततः सरस्वत्यै नम इति। ततः गाथां गायति॥
ततोऽग्नयेनम इत्यग्निं परिक्रम्य। पुनर्द्विलाजादिक्रमं तं कृत्वा। चतुर्थं शूर्पपुटेन वधूञ्जातासर्वलाजान्क
न्यां जलावावपति॥ तान् भगाय नम इति तिष्ठन्ती जुहोति॥ ततोऽग्निं चतुर्थं परिक्रम्योपविश्य ब्रह्मान्वारब्धे ५०
प्रजापतये नम इति कुर्त्वोत्तरतः उदक्तं स्थाल्यमतं तुलपुंजान्कृत्वा वधूर्विष्णवे नम इति। दक्षिणेन पदा वरः
सप्तपदानि क्रामयति॥ इषे नमः। विष्णवे नमः सर्वत्र॥ ऊर्जे० रायस्पोषाय०। मायोभवाय० पशुभ्यो० ऋतु

भ्यो० सखिभ्यो नम इत्येतेरिति के चित्॥ ततः सप्तमेपदे गुरुर्द्वयोः शिरसि सन्निधाय पूर्वे कुम्भोदकेन वर आ
म्रपल्लवैरभिषिंचेत्॥ वरेण सूर्यमुदीक्षस्वेत्युक्ता सूर्याय नम इति सूर्यं पश्येत्। भमनवचि — वाग्भ्यो नम इ
ति वधूदक्षिणांसोपरि हस्तं नीत्वा हृदयमालभ्योत्तरतो वधमुपवेश्य वध्वै नम इत्यभिमंत्र्य तस्याः सीमंते सिं
दूरं दत्वाऽन्यो वरो वा वधूस्थाप्य गोश्व पुरुषेभ्यो नमः। तयोरग्नौ प्रक्षेपः॥ आचार्याय गोदानं॥ प्रणीतानिमो
कः। ब्रह्मणे पूर्णपात्र॥ विप्रेभ्य आमान्नसंकल्पः॥ दिने विवाहे रात्रौ ध्रुवमीक्षस्वेति वरप्रेषिता वधूर्ध्रुवा
य नम इति पश्येत्। ततोर्ध्वं द्वादशरात्रं षडात्रं त्रिरात्रं वाऽक्षारालवणाशिनौ ब्रह्मचारिणावलंकुर्वाणावधः
शायिनौ दंपती स्यातां॥ तैलाक्ष तवंदनादि यथाचारं कुर्यात्। चतुर्थ्यामपररात्रे पचभूसंस्कारान्कृत्वा विवा
हाग्निं संस्थाप्य ब्रह्मोपवेशनादि यथाचारं समिदाधानांतं प्राग्वत्कुर्यात्॥ तत्राज्यं निरूप्य स्थाल्यां तन्दुलैश्
चरुं निरूप्य तथैव प्रोक्ष्य त्रिः प्रक्षाल्याग्नेयन्कास समिधोऽभ्याधायाग्निपर्युक्षाघारावाज्यभागांते अग्नये प्रा
यश्चित्ताय नमः। एवं वायवे सूर्याय० चंद्राय० गन्धर्वाय० नवाहुत्यंते चरुं हुत्वा प्रजापतये नम इत्यनेन॥ ततोऽद

Indira Gandhi National
Centre for the Arts

ॐ भात्संस्रवानादाय अग्निवायुसूर्यचंद्रनक्षत्रगंधर्वप्रजापतिभ्यो नम इति वधूशिरसि दत्वा। मम व्रतानुसारी
४२ णि भवेत्युक्त्वा नरतो ऽग्नेश्च रुशेषं प्राणेभ्यो नमः अस्थिभ्यो मांसेभ्यो त्वचे नम इति वधूं प्राशयित्वा नामाचम्याज्ये
नाग्नये स्विष्टकृते नम इति हुत्वा अग्न्यादिप्रजापत्यंतान आहुतयः प्राशनार्थं भिन्नपात्रे संस्रवाः। संस्रवप्राशनं। मा
र्जनं॥ पवित्रप्रतिपत्तिः। गुरवे दक्षिणां ब्रह्मणे पूर्णपात्रं भामान्नदानं चेति॥ स्मृतिकौमुद्यां तु शूद्रस्य कोपि होमो न
स्युक्तः॥ तन्न॥ सामृतापि हि तैनेक्ष्यं गतामंत्राद् इति वृते रित्यस्य शूद्रेष्वविशेषात्। ततो वरस्य तत्पत्नी रुआणां पू
जनं वरमात्रे वंशपात्रदानं च कार्यं कन्यापित्रेति केचित्॥ षोडश लघु शूर्पं नूतनं वंशपात्रे उमामहेश्वरौ संपूज्य प्रा
र्थयेत्॥ गौरि गौरि त्वमुमादेवि महेशो गिरिजापतिः॥ अतस्त्वां पूजयिष्यामि गौरि गौरि सर्वकामदे। सवस्त्रां च सदीपां ४२
च शूर्पैः षोडशभिर्युतां॥ वरमात्रे प्रदास्यामि कन्यादानस्य सिद्धये इत्युक्त्वा॥ कृतस्य कन्यादानस्य संपूर्णफलप्रा
प्त्यर्थमिदं वंशपात्रं वरमात्रे संप्रददे न मम इत्युक्त्वा पठेत्। वंशो वंशकरः श्रेष्ठो वंशो वंशविवर्धनः। अनेन वंशदाने
न तुष्टो रुद्रं करोतु मे॥ वंशपात्रमिदं पुण्यं वंशजातं समुद्भवं। दानानामुत्तमं दानं मतः शांतिं प्रयच्छ मे इति॥ इ

दं केचिन्न कुर्वंति। ततः कन्यापिता अष्टवर्षात्मिकं कन्या पुत्रवत्पालिता मया॥ इदानीं तु मया तुभ्यं दत्ता स्नेहेन पा
ल्यतामिति वराके वधुमुपवेशयेत्॥ ततो वरो यानेन वध्वा सह गृहं गत्वा तत्र श्रियं संपूज्य स्थापितानामाहूतानां मंडपं
देवतानां च पूजां कृत्वा दिस्त्यदस्त्र ग्रंथिकंकणमोक्षौ कृत्वा विप्रान्पूजयेत्॥ वध्वा गृहप्रवेशं मंडपोद्वासने कालोन्यश्च
विशेषो मत्कृते निर्णयसिंधौ ज्ञेयः॥ एते संस्काराः सच्छूद्राणां॥ एवं वस्य भाणमाह्निकापि तेषां नियतं॥ असच्छू
द्रे विवाहमात्रं॥ ॥इति श्रीमन्नारायणभट्टसूरिसुतरामकृष्णभट्टसुतकमलाकरभट्टकृते शूद्रधर्मसंस्काराः॥ ॥
अथ शूद्रस्याह्निकमुच्यते॥ ॥तत्र विष्णुः॥ ब्राह्मे मुहूर्ते उत्थायेति॥ शयनादुत्थितो यस्तु कीर्तयेन्मधुसूदनं॥ की
र्तनात्तस्य पापानि नाशमायांत्यशेषतः॥ तत्राचम्य पितरौ विष्टदेवं च नत्वा॥ प्रातः स्मरामि भवभीतिमहार्तिशांत्यै ना
रायणं गरुडवाहनमंजनाभं। ग्राहाभिभूतवरवारणमुक्तिहेतुं चक्रायुधं तरुणवारिजपत्रनेत्रं॥ प्रातर्नमामि मनसा वा
चसा च मूर्ध्ना पादारविंदयुगलं परमस्य पुंसः॥ नारायणस्य नरकार्णवतारणस्य पारायणप्रवणविप्रपरायणस्य॥
प्रातर्भजामि भजतामभयंकरं तं प्राक्सर्वजन्मकृतपापभयापहत्यै॥ यो ग्राहवक्त्रपतितांघ्रिगजेंद्रघोरशोकप्रना

Indira Gandhi National Centre for the Arts

एनकुरोदूनरांरवचक्रः॥ श्लोकत्रयमिदंपुण्यंप्रातःप्रातस्तुयःपठेत्॥ श्लोकत्रयगुरुस्तस्मैदद्यादात्मपदंहरिः॥
नस्मरामिशिवमेकमनेकमाघमित्यादियथावासरंपठित्वा॥ पुण्यश्लोकोनलोराजापुण्यश्लोकोयुधिष्ठिरः। पुण्य
श्लोकाचवैदेहीपुण्यश्लोकोजनार्दनः॥ इत्युक्त्वाभूमिंनमस्कृत्यः अराजापुण्यश्लोकोजनार्दन॥ इत्युक्त्वाभूमिंन॰
मस्कृत्यः अन्तर्धायतृणैर्भूमिंशिरःप्रावृत्यवाससा॥ वाचंनियम्ययत्नेननिष्ठीवोच्छ्वासवर्जितः॥ कुर्यान्मूत्रपुरीषेतुशु
चौदेशेसमाहितः दिनइत्यगिरसोक्तविधिना॥ दिवासंध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखः॥ कुर्यान्मूत्रपुरीषेतुरात्रौ
वैदक्षिणामुखः॥ ग्रामात्यदशतंगच्छेन्नगराच्चचतुर्गुणमितियाज्ञवल्क्यपराशरघुक्तेदेशेमूत्रपुरीषेकृत्वाअ
पकृष्यचविण्मूत्रकाष्ठलोष्ठतृणादिनेतिभरद्वाजोक्तेलोष्ठादिनावामेनगुदंप्रमृज्यगृहीनशिश्नश्चोत्थायमृद्भि
रभ्युद्धृतैर्जलैःगंधलेपक्षयकरंशौचंकुर्यादितिदिनइतियाज्ञवल्क्योक्तःशौचंकुर्यात्। तत्रमूत्रेशौचानयः॥ए
कालिंगेकरेसव्येतिस्रोर्द्धहस्तयोर्द्वयोः मूत्रेशौचंसमाख्यातंशुक्रेतद्द्विगुणंभवेत्॥ पुरीषेतुदशयमो॥ द्वेलि
गेमृत्तिकेदेयेगुदेपंचकरेदश॥ उभयोःसप्तदातव्यामृदःशौचोपपादिकाः॥ शंख॥ मेहनेमृत्तिकाःसप्तलिंगेद्वे

Indira Gandhi National
Centre for the Arts